श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमदानन्दरामायणे मनोहरकाण्डे

# ॥ श्रीसीताष्टोत्तरशतनामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Smt. Nalini Persad and Mr. Burkhard Quessel of The British Library, London, for providing us the text of this stotram. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीसीताष्टोत्तरशतनामस्तोत्रम् ॥

अगस्तिरुवाच
एवं सुतीक्ष्ण सीतायाः कवचं ते मयेरितम्।
अतः परं श्रुणुष्वान्यत् सीतायाः स्तोत्रमुत्तमम्॥ १ ॥

यस्मिन्नष्टोत्तरशतं सीतानामानि सन्ति हि।
अष्टोत्तरशतं सीता नाम्नां स्तोत्रमनुत्तमम्॥ २ ॥

ये पठन्ति नरास्त्वत्र तेषां च सफलो भवः।
ते धन्या मानवा लोके ते वैकुण्ठं व्रजन्ति हि॥ ३ ॥

न्यासः

अस्य श्री सीतानामाष्टोत्तर शतमन्त्रस्य अगस्त्य ऋषिः।
अनुष्टुप् छन्दः। रमेति बीजम्। मातुलिङ्गीति शक्तिः।
पद्माक्षजेति कीलकम्। अवनिजेत्यस्त्रम्। जनकजेति कवचम्।
मूलकासुर मर्दिनीति परमो मन्त्रः।
श्री सीतारामचन्द्र प्रीत्यर्थं सकल कामना सिद्ध्यर्थं
जपे विनियोगः॥

करन्यासः

ओं सीतायै अङ्गुष्ठाभ्यां नमः।
ओं रमायै तर्जनीभ्यां नमः।
ओं मातुलिङ्ग्यै मध्यमाभ्यां नमः।
ओं पद्माक्षजायै अनामिकाभ्यां नमः।
ओम् अवनिजायै कनिष्ठिकाभ्यां नमः।
ओं जनकजायै करतल करपृष्ठाभ्यां नमः॥

www.prapatti.com

## अङ्गन्यासः

ओं सीतायै हृदयाय नमः।
ओं रमायै शिरसे स्वाहा।
ओं मातुलिङ्ग्यै शिकायै वषट्।
ओं पद्माक्षजायै नेत्रत्रयाय वौषट्।
ओं जनकात्मजायै अस्त्राय फट्।
ओं मूलकासुरमर्दिन्यै इति दिग्बन्धः॥

## ध्यानम्

वामाङ्गे रघुनायकस्य रुचिरे या संस्थिता शोभना
या विप्राधिप यान रम्य नयना या विप्रपालानना।
विद्युत्पुञ्ज विराजमान वसना भक्तार्ति सङ्खण्डना
श्रीमद् राघव पादपद्मयुगळ न्यस्तेक्षणा साऽवतु॥

श्री सीता जानकी देवी वैदेही राघवप्रिया।
रमाऽवनिसुता रामा राक्षसान्तप्रकारिणी॥ १॥

रत्नगुप्ता मातुलिङ्गी मैथिली भक्ततोषदा।
पद्माक्षजा कञ्जनेत्रा स्मितास्या नूपुरस्वना॥ २॥

वैकुण्ठनिलया मा श्रीर्मुक्तिदा कामपूरणी।
नृपात्मजा हेमवर्णा मृदुलाङ्गी सुभाषिणी॥ ३॥

कुशाम्बिका दिव्यदा च लवमाता मनोहरा।
हनूमद्वन्दितपदा मुग्धा केयूरधारिणी॥ ४॥

अशोकवनमध्यस्था रावणादिकमोहिनी।
विमानसंस्थिता सुभ्रूः सुकेशी रशनान्विता॥ ५॥

रजोरूपा सत्त्वरूपा तामसी वह्निवासिनी।
हेममृगासक्तचित्ता वाल्मीकाश्रमवासिनी॥ ६॥

www.prapatti.com

पतिव्रता महामाया पीतकौशेयवासिनी।
मृगनेत्रा च बिम्बोष्ठी धनुर्विद्याविशारदा॥ ७॥

सौम्यरूपा दशरथस्नुषा चामर वीजिता।
सुमेधादुहिता दिव्यरूपा त्रैलोक्यपालिनि॥ ८॥

अन्नपूर्णा महालक्ष्मीः धीर्लज्जा च सरस्वती।
शान्तिः पुष्टिः शमा गौरी प्रभाऽयोध्यानिवासिनी॥ ९॥

वसन्तशीतला गौरी स्नानसन्तुष्टमानसा।
रमानामभद्रसंस्था हेमकुम्भपयोधरा॥ १०॥

सुरार्चिता धृतिः कान्तिः स्मृतिर्मेधा विभावरी।
लघूदरा वरारोहा हेमकङ्कणमण्डिता॥ ११॥

द्विजपत्न्यर्पितनिजभूषा राघवतोषिणी।
श्रीरामसेवनरता रत्नताटङ्कधारिणी॥ १२॥

रामवामाङ्गसंस्था च रामचन्द्रैकरञ्जिनी।
सरयूजलसङ्क्रीडाकारिणी राममोहिनी॥ १३॥

सुवर्णतुलिता पुण्या पुण्यकीर्तिः कलावती।
कलकण्ठा कम्बुकण्ठा रम्भोरूर्गजगामिनी॥ १४॥

रामार्पितमना रामवन्दिता रामवल्लभा।
श्रीरामपदचिह्नाङ्का रामरामेतिभाषिणी॥ १५॥

रामपर्यङ्कशयना रामाङ्घ्रिक्षालिणीवरा।
कामधेन्वन्नसन्तुष्टा मातुलिङ्गकरधृता॥ १६॥

दिव्यचन्दनसंस्था श्रीर्मूलकासुरमर्दिनी।
एवमष्टोत्तरशतं सीतानाम्नां सुपुण्यदम्॥ १७॥

ये पठन्ति नरा भूम्यां ते धन्याः स्वर्गगामिनः।
अष्टोत्तरशतं नाम्नां सीतायाः स्तोत्रमुत्तमम्॥ १८॥



www.prapatti.com

जपनीयं प्रयत्नेन सर्वदा भक्ति पूर्वकम्।
सन्ति स्तोत्राण्यनेकानि पुण्यदानि महान्ति च॥ १९ ॥

नानेन सदृशानीह तानि सर्वाणि भूसुर।
स्तोत्राणामुत्तमं चेदं भुक्ति मुक्ति प्रदं नृणाम्॥ २० ॥

एवं सुतीक्ष्ण ते प्रोक्तम् अष्टोत्तर शतं शुभम्।
सीतानाम्नां पुण्यदञ्च श्रवणान् मङ्गळ प्रदम्॥ २१ ॥

नरैः प्रातः समुत्थाय पठितव्यं प्रयत्नतः।
सीता पूजन कालेऽपि सर्व वाञ्छितदायकम्॥ २२ ॥

॥ इति श्रीसीताष्टोत्तरशतनामस्तोत्रं समाप्तम्॥

www.prapatti.com